अष्टमः पाठः

# कर्मवीर कथा

**(पाठेऽस्मिन् समाजे दलितस्य ग्रामवासिनः पुरुषस्य कथा वर्तते। कर्मवीरः असौ निजोत्साहेन विद्यां प्राप्य महत्पदं लभते, समाजे च सर्वत्र सत्कृतो भवति। कथाया मूल्यं वर्तते यत् निराशो न स्यात्, उत्साहेन सर्वं कर्तुं प्रभवेत्।)**

अस्ति बिहारराज्यस्य दुर्गमप्राये प्रान्तरे 'भीखनटोला' नाम ग्रामः। निवसन्ति स्म तत्रातिनिर्धनाः शिक्षाविहीनाः क्लिष्टजीवनाः जनाः। तेष्वेवान्यतमस्य जनस्य परिवारो ग्रामाद् बहिःस्थितायां कुट्यां न्यवसत्। कुटी तु जीर्णप्रायत्वात् परिवारजनान् आतपमात्राद् रक्षति, न वृष्टेः। परिवारे स्वयं गृहस्वामी, तस्य भार्या तयोरेकः पुत्रः कनीयसी दुहिता चेत्यासन्।

तस्माद् ग्रामात् क्रोशमात्रदूरं प्राथमिको विद्यालयः प्रशासनेन संस्थापितः। तत्रैको नवीनदृष्टिसम्पन्नः सामाजिकसामरस्यरसिकः शिक्षकः समागतः। भीखनटोलां द्रष्टुमागतः स कदाचित् खेलनरतं दलितबालकं विलोक्य तस्यापातरमणीयेन स्वभावेनाभिभूतः। शिक्षकं बालकमेनं स्वविद्यालयमानीय स्वयं शिक्षितुमारभत। बालकोऽपि तस्य शिक्षणशैल्याकृष्टः शिक्षाकर्म जीवनस्य परमा गतिरिति मन्यमानो निरन्तरमध्यवसायेन विद्याधिगमाय निरतोऽभवत्। क्रमशः उच्चविद्यालयं गतस्तस्यैव शिक्षकस्याध्यापनेन स्वाध्यवसायेन च प्राथम्यं प्राप। 'छात्राणामध्ययनं तपः' इति भूयोभूयः स्वविद्यागुरुणोपदिष्टोऽसौ बालकः पित्रोरर्थाभावेऽपि छात्रवृत्त्या कनीयश्छात्राणां शिक्षणलब्धेन धनेन च नगरगते महाविद्यालये प्रवेशमलभत।

तत्रापि गुरूणां प्रियः सन् सततं पुस्तकालये स्ववर्गे च सदावहितचेतसा अकृतकालक्षेपः स्वाध्यायनिरतोऽभूत्। महाविद्यालयस्य पुस्तकागारे बहूनां विषयाणां पुस्तकानि आत्मसादसौ कृतवान्। तत्र स्नातकपरीक्षायां विश्वविद्यालये प्रथमस्थानमवाप्य स्वमहाविद्यालयस्य ख्यातिमवर्धयत्। सर्वत्र रामप्रवेशराम इति शब्दः श्रूयते स्म नगरे विश्वविद्यालयपरिसरे च। नाजानतां पितरावस्य विद्याजन्यां प्रतिष्ठाम्।

वर्षान्तरेऽसौ केन्द्रीयलोकसेवापरीक्षायामपि स्वाध्यवसायेन व्यापकविषयज्ञानेन च उन्नतं स्थानमवाप। साक्षात्कारे च समितिसदस्यास्तस्य व्यापकेन ज्ञानेन, तत्रापि तादृशे परिवारपरिवेशे कृतेन श्रमेणाभ्यासेन च परं प्रीताः अभूवन्।

अद्य रामप्रवेशरामस्य प्रतिष्ठा स्वप्रान्ते केन्द्रप्रशासने च प्रभूता वर्तते। तस्य प्रशासनक्षमतां संकटकाले च निर्णयस्य सामर्थ्यं सर्वेषामावर्जके वर्तेते। नूनमसौ कर्मवीरो व्यतीत्य बाधाः प्रशासनकेन्द्रे लोकप्रियः संजातः। सत्यमुक्तम् – उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः।

## पदच्छेदाः

| | | |
|---|---|---|
| पाठेऽस्मिन् | – | पाठे + अस्मिन् |
| निजोत्साहेन | – | निज + उत्साहेन |
| तत्रातिनिर्धनाः | – | तत्र + अतिनिर्धनाः |
| तेष्वेवान्यतमस्य | – | तेषु + एव + अन्यतमस्य |
| न्यवसत् | – | नि + अवसत् |
| तयोरेकः | – | तयोः + एकः |
| चेत्यासन् | – | च + इति + आसन् |
| तत्रैकः | – | तत्र + एकः |
| तस्यापातरमणीयेन | – | तस्य + आपातरमणीयेन |
| स्वभावेनाभिभूतः | – | स्वभावेन + अभिभूतः |
| बालकमेनम् | – | बालकम् + एनम् |
| शिक्षितुमारभत | – | शिक्षितुम् + आरभत |
| बालकोऽपि | – | बालकः + अपि |
| शिक्षणशैल्याकृष्टः | – | शिक्षणशैल्या + आकृष्टः |
| गतिरिति | – | गतिः + इति |
| विद्याधिगमाय | – | विद्या + अधिगमाय |
| गतस्तस्यैव | – | गतः + तस्य + एव |

ABDIEL SOLUTIONS ABSOL PATNA

| | | |
|---|---|---|
| निरतोऽभवत् | – | निरतः + अभवत् |
| शिक्षकस्याध्यापनेन | – | शिक्षकस्य + अध्यापनेन |
| स्वविद्यागुरुणोपदिष्टोऽसौ | – | स्वविद्यागुरुणा + उपदिष्टः + असौ |
| पित्रोरर्थाभावेऽपि | – | पित्रोः + अर्थ + अभावे + अपि |
| कनीयश्छात्राणाम् | – | कनीयस् + छात्राणाम् |
| पुस्तकालये | – | पुस्तक + आलये |
| सदावहितचेतसा | – | सदा + अवहितचेतसा |
| स्वाध्यायनिरतोऽभूत् | – | स्व + अध्यायनिरतः + अभूत् |
| पुस्तकागारे | – | पुस्तक + आगारे |
| आत्मसादसौ | – | आत्मसात् + असौ |
| अवाप्य | – | अव + आप्य |
| नाजानताम् | – | न + अजानताम् |
| पितरावस्य | – | पितरौ + अस्य |
| वर्षान्तरेऽसौ | – | वर्ष + अन्तरे + असौ |
| समितिसदस्यास्तस्य | – | समितिसदस्याः + तस्य |
| श्रमेणाभ्यासेन | – | श्रमेण + अभ्यासेन |
| व्यतीत्य | – | वि + अति + इत्य |
| उपैति | – | उप + एति |

## पदार्थाः

| | | | | |
|---|---|---|---|---|
| क्लिष्टजीवनाः | – | कठिनजीवनाः | – | कठिनाई से जीवन जीनेवाले |
| आतपमात्रात् | – | घर्ममात्रात् | – | धूप मात्र से |
| जीर्णप्रायत्वात् | – | जर्जरत्वात् | – | लगभग जर्जर होने से |
| कनीयसी | – | लघीयसी | – | छोटी |
| सामाजिकसामरस्यरसिकः | – | सामाजिकसमरसताप्रियः | – | सामाजिक समरसता के पक्षपाती |

| | | | | |
|---|---|---|---|---|
| नवीनदृष्टिसम्पन्नः | - | नवदृष्टियुक्तः | - | नवीन दृष्टि से युक्त |
| समागतः | - | समागतवान् | - | आया (आए) |
| खेलनरतम् | - | क्रीडारतम् | - | खेलने में मग्न |
| विलोक्य | - | दृष्ट्वा | - | देखकर |
| आपातरमणीयेन | - | तत्क्षणरम्येन | - | तत्क्षण रमणीय, सहज आकर्षक (से) |
| अभिभूतः | - | प्रभावितः | - | प्रभावित |
| शिक्षितुमारभत | - | पाठयितुं लग्नः | - | पढ़ाने लगा (लगे) |
| स्वाध्यवसायेन | - | स्वपरिश्रमेण | - | अपने परिश्रम से |
| विद्याधिगमाय | - | विद्याप्राप्तये | - | विद्यालाभ के लिए |
| निरतः | - | तल्लीनः | - | तत्पर |
| प्राथम्यम् | - | प्रथमस्थानम् | - | प्रथम स्थान को |
| प्राप | - | अवाप | - | प्राप्त किया |
| भूयो भूयः | - | वारंवारम् | - | बार-बार |
| उपदिष्टः | - | प्राप्तोपदेशः/शासितः | - | उपदेश प्राप्त |
| अर्थाभावे | - | धनाभावे | - | धन के अभाव में |
| सावहितचेतसा | - | सावधानमनसा | - | सावधान मन से |
| अकृतकालक्षेपः | - | अकृतसमयनाशः | - | समय न गँवानेवाला |
| साक्षात्कारे | - | अन्तर्वीक्षायाम् | - | साक्षात्कार में, इण्टरव्यू में |
| अभूवन् | - | अभवन् | - | हुए |
| प्रीताः | - | प्रसन्नाः | - | प्रसन्न |
| प्रभूता | - | अत्यधिका | - | बहुत अधिक |
| आवर्जकम् | - | आकर्षकम् | - | आकर्षक |
| व्यतीत्य | - | नीत्वा | - | बिताकर |
| सञ्जातः | - | अभवत् | - | हो गया |

| | | |
|---|---|---|
| उक्तम् – | कथितम् – | कहा गया है |
| उपैति – | प्राप्नोति – | प्राप्त करती है (करता है) |

## व्याकरणम्

### समास:

| | | |
|---|---|---|
| कर्मवीर: – | कर्मणि वीर: – | (सप्तमी तत्पुरुष:) |
| निजोत्साहेन – | निज: उत्साह: तेन – | (कर्मधारय:) |
| विहारराज्यस्य – | विहार: चासौ राज्यम्, तस्य – | (कर्मधारय:) |
| परिवारजनान् – | परिवारस्य जनान् – | (षष्ठी तत्पुरुष:) |
| नवीनदृष्टिसम्पन्न: – | नवीना दृष्टि: यथा सम्पन्न: – | (तृतीया तत्पुरुष:) |
| सामाजिके सामरस्ये रसिक: – | सामाजिकसामरस्यरसिक: – | (सप्तमी तत्पुरुष:) |
| अर्थाभावे – | अर्थस्य अभावे – | (षष्ठी तत्पुरुष:) |
| क्लिष्टजीवना: – | क्लिष्टं जीवनं येषां, ते – | (बहुव्रीहि:) |
| खेलनरतम् – | खेलने रतम् – | (सप्तमी तत्पुरुष:) |
| दलितबालकम् – | दलितश्चासौ बालक:, तम् – | (कर्मधारय:) |
| आपातरमणीयेन – | आपातेन रमणीय: तेन – | (तृतीया तत्पुरुष:) |
| विद्याधिगमाय – | विद्याया: अधिगमाय – | (षष्ठी तत्पुरुष:) |
| शिक्षणलब्धेन – | शिक्षणेन लब्धेन – | (तृतीया तत्पुरुष:) |
| सावहितचेतसा – | सावहितं चेत:, तेन – | (कर्मधारय) |
| अकृतकालक्षेप: – | न कृत: कालस्य क्षेप: येन, स:, – | (बहुव्रीहि) |
| विश्वविद्यालयपरिसरे – | विश्वविद्यालयस्य परिसरे – | (षष्ठी तत्पुरुष:) |
| पुरुषसिंहम् – | पुरुष: सिंह इव, तम् – | (कर्मधारय:) |
| शिक्षाविहीना – | शिक्षया विहीना: – | (तृतीय तत्पुरुष:) |

## प्रकृतिप्रत्ययविभागः

| | | |
|---|---|---|
| निरतः | – | नि + रम् + क्त |
| अध्यापनम् | – | अधि + इङ् + णिच् + ल्युट् |
| लब्धम् | – | लभ् + क्त |
| ख्यातिम् | – | ख्यै + क्तिन् (द्वि. ए. व.) |
| कृतवान् | – | कृ + क्तवतु |
| उपदिष्टः | – | उप + दिश् + क्त |
| अभिभूतः | – | अभि + भू + क्त |
| आकृष्टः | – | आङ् + कृष् + क्त |
| ज्ञानेन | – | ज्ञा + ल्युट् (तृ. ए. व.) |
| प्रीताः | – | प्री + क्त (प्र. ब. व.) |
| सञ्जातः | – | सम् + जन् + क्त |
| व्यतीत्य | – | वि + अति + इण् + ल्यप् |
| कृतेन | – | कृ + क्त (तृ. ए. व.) |

## अभ्यासः

### ( मौखिकः )

1. **एकपदेन उत्तरं वदत –**

(क) कर्मवीरः कः अस्ति ?

(ख) बिहारप्रान्तस्य दुर्गमप्राये प्रान्तरे कः ग्रामः अस्ति ?

(ग) 'भीखनटोला' ग्रामे शिक्षकः कं दृष्टवान् ?

(घ) कर्मवीरः रामप्रवेशः कुत्र उन्नतं स्थानं प्राप्तवान् ?

(ङ) केन कर्मवीरः उन्नतं स्थानमवाप ?

## अभ्यासः

### ( लिखितः )

1. **एकपदेन उत्तरं लिखत -**

(क) रामप्रवेशस्य ग्रामस्य नाम किम् अस्ति ?

(ख) भीखनटोलां द्रष्टुं कः आगतः ?

(ग) बालकः कस्य शिक्षणशैल्याकृष्टः ?

(घ) स्नातकपरीक्षायां प्रथमस्थानं प्राप्य कस्य ख्यातिमवर्धयत् ?

(ङ) उद्योगिनं पुरुषसिंहं का उपैति ?

2. **पूर्णवाक्येन उत्तरं लिखत -**

(क) 'भीखनटोला' ग्रामः कुत्र अस्ति ?

(ख) प्राथमिकविद्यालये कीदृशः शिक्षकः समागतः ?

(ग) शिक्षकः कं शिक्षितुमारभत ?

(घ) रामप्रवेशः कस्यां परीक्षायाम् उन्नतं स्थानमवाप ?

(ङ) कयोः अर्थाभावेऽपि रामप्रवेशः महाविद्यालये प्रवेशमलभत ?

(च) साक्षात्कारे समितिसदस्याः किमर्थं प्रीताः अभवन् ?

(छ) रामप्रवेशस्य प्रतिष्ठा कुत्र-कुत्र दृश्यते ?

(ज) लक्ष्मीः कीदृशं जनम् उपैति ?

3. **उदाहरणम् अनुसृत्य रक्षति/त्रायते क्रियापदस्य प्रयोगं कृत्वा मञ्जूषातः पदानि चित्वा, तत्र समुचितविभक्तिं संयोज्य सप्त वाक्यानि रचयत -**

उदाहरणम् - (क) गृहं सूर्यस्य आतपात् मेघस्य वर्षणात् च त्रायते।

(ख) पिता पुत्रं विघ्नात् रक्षति।

पद्मजा, देवदत्तः, रमेशः, करीमः, शैलेशः, दिव्येशः, शत्रुः, पवनः, वेगः, रोगः, वैद्यः, चौरः, प्रहरी, सैनिकः, देशः, आतङ्कवादी, लुण्ठकः, धर्मात्मा, पापम्, सज्जनः, दोषः

4. **निम्नाङ्कितानां समस्तपदानां विग्रहं कृत्वा समासनामानि लिखत –**

(क) अकृतकालक्षेप:

(ख) पुस्तकागारम्

(ग) स्नातकपरीक्षायाम्

(घ) दलितबालकम्

(ङ) क्लिष्टजीवना:

(च) नवीनदृष्टिसम्पन्न:

(छ) सामाजिकसामरस्यसम्पन्न:

(ज) स्वाध्यायनिरत:

5. **पठितपाठम् अनुसृत्य निम्नलिखितपदानां पर्यायरूपाणि लिखत –**

(उदाहरणम् – पुस्तकालय: – पुस्तकागारम्)

(क) कठिनजीविता:

(ख) अकृतसमयनाश:

(ग) क्षमता

(घ) जनप्रिय:

(ङ) आकर्षकम्

(च) संलग्न:

(छ) परिश्रम:

(ज) धनाभाव:

(झ) सावधानमनसा

(ञ) सद्य: आकर्षकेण

## योग्यताविस्तार:

प्रस्तुतपाठः कर्मणः परिश्रमस्य महत्त्वं चित्रयति। विद्या अभ्यासानुसारिणी। कस्यापि उन्नतवंशस्य सुरक्षितनिधिः नास्तीयं विद्या। अतः सत्यनिष्ठया मनोयोगेन अध्यवसायेन अर्जिता विद्या सफला यशस्करी च भवति। अयं पाठः उपदिशति यत् निर्धनः, दलितः, शोषितः, वञ्चितः अपि बालः आचार्यस्य सम्यग् निर्देशनेन पठित्वा-लिखित्वा विज्ञो भूत्वा देशस्य विश्वस्य शीर्षस्थः जनः संजायते। सामाजिकविज्ञानस्य शिक्षकाणां सहयोगेन अमेरिकादेशेषु कर्मवीराणां दलित-शोषित-वर्गाणां राजनायकानां चरितानि संगृह्णीयात्।

2. स्वदेशस्य बाबासाहेबभीमराव-अम्बेदकरस्य जगजीवनरामस्य, कर्पूरीठाकुरस्य तथान्येषाम् उपेक्षितवर्गाणां कर्मवीराणां राजनीतिज्ञानां ज्ञानं प्राप्नुयात्।

3. दलितवसतिषु अभियानं चालयित्वा सामाजिकसमरसतायाः वैदिकः सन्देशः श्रावणीयः यथायोग्यं व्यावहारिकः कार्यक्रमः यथा- प्रीतिभोजः, सामूहिकः उत्सवः चादयः आयोजनीयाः।

**समरसतामन्त्रः -**

सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे सञ्जानाना उपासते।।
समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्।
समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि।। (ऋग- 10.12.19)

4. **परिश्रमस्य महत्त्वं संस्कृतगीतेषु दृश्यते। यथा-**

प्रयत्नेन कार्ये सुसिद्धिर्जनानां
प्रयत्नेन सद्बुद्धिवृद्धिर् जनानाम्।
प्रयत्नेन युद्धे जयः स्याज्-जनानां
प्रयत्नो विधेयः प्रयत्नो विधेयः।।
प्रयत्नेन धीराः समुद्रं तरन्ति।
प्रयत्नेन वीरा गिरीन् लंघयन्ति ।

प्रयत्नेन मूर्खाः सुयोग्या भवन्ति।
प्रयत्नो विधेयः प्रयत्नो विधेयः॥

5. **गीतायाः उपदेशः -**

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥

□

ABDIEL SOLUTIONS ABSOL PATNA